# Dhumravarna Stotram Devamunikritam

# દેવમુનિકૃતં ધૂમ્રવર્ણસ્તોત્રમ્

## Document Information

Text title : Dhumravarna Stotram Devamunikritam

File name : dhUmravarNastotramdevamunikRRitaM.itx

Category : ganesha, mudgalapurANa, stotra

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM aShTamaH khaNDaH | adhyAyaH 4 | 8.4 34-48||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

# દેવમુનિકૃતં ધૂમ્રવર્ણસ્તોત્રમ્

॥ શ્રીગણેશાય નમઃ ॥
દેવર્ષય ઊચુઃ ।
ધૂમ્રવર્ણાય સર્વેભ્યઃ સર્વદાય કૃપાલવે ।
ગણેશાય પરેશાય પરાત્પરાય તે નમઃ ॥ ૩૪॥
લમ્બોદરાય વિઘ્નાનાં પતયે તે નમો નમઃ ।
વિઘ્નકર્ત્રે ચ તદ્ધર્ત્રે હેરમ્બાય નમો નમઃ ॥ ૩૫॥
અનાદયે વિશેષેણ જ્યેષ્ઠાય સર્વપૂજિત ।
મનોવાણીવિહીનાય મનોવાણીમયાય તે ॥ ૩૬॥
નમસ્તે બ્રહ્મરૂપાય બ્રહ્મણે બ્રહ્મદાયિને ।
બ્રહ્મણાં પતયે તુભ્યં મન્ત્રનાથાય તે નમઃ ॥ ૩૭॥
મહોરૂપાય દેવાય દેવદેવેશરૂપિણે ।
દેવેભ્યો વરદાત્રે તે મહોદર નમો નમઃ ॥ ૩૮॥
આદિપૂજ્યાય સર્વેષાં માત્રે પિત્રે નમો નમઃ ।
સર્વરૂપાય સર્વાત્મન્ કર્મરૂપાય તે નમઃ ॥ ૩૯॥
શૂર્પકર્ણાય શૂરાય વીરાય પરમાત્મને ।
ચતુર્ભુજાય ધૂમ્રાય ગુણેશાય નમો નમઃ ॥ ૪૦॥
કર્ત્રે હર્ત્રે ચ ભર્ત્રે તે પરજ્ઞાનસ્વરૂપિણે ।
સ્વાધીનાય મહામોહદાત્રે હર્ત્રે નમો નમઃ ॥ ૪૧॥
યત્ર વેદાદયઃ સ્વામિન્ શાન્તિં પ્રાપ્તાશ્ચ યોગિનઃ ।
ગણેશ તત્ર કે નાથ વયં તે સ્તવને પ્રભો ॥ ૪૨॥
વર્ણા ધૂમ્રાયિતા યત્રાવ્યક્તરૂપે પૂરા ત્વયિ ।
ધૂમ્રવર્ણઃ સમાખ્યાતો વેદેષુ વેદવાદિભિઃ ॥ ૪૩॥
ધન્યા વયં મહાભાગ ત્વદઙ્ઘ્રિયુગદર્શનાત્ ।
અવ્યક્તો વ્યક્તતાં પ્રાપ્તો ભક્તવાત્સલ્યકારણાત્ ॥ ૪૪॥
એવમુક્ત્વા પ્રણેમુસ્તં ધૂમ્રવર્ણં સુરર્ષયઃ ।

ઉત્થાપ્ય ધૂમ્રવર્ણસ્તાન્ જગાદ મેઘનિઃસ્વનઃ ॥ ૪૫॥
(ફલશ્રુતિઃ)
ધૂમ્રવર્ણ ઉવાચ ।
ભવત્કૃતમિદં સ્તોત્રં સર્વસિદ્ધિપ્રદાયકમ્ ।
ભવિષ્યતિ મહાભાગાઃ પઠેત શ ृણ્વતે પરમ્ ॥ ૪૬॥
પુત્રપૌત્રાદિકં ધાન્યં ધનં લભેન્નરસ્તથા ।
યદ્યદિચ્છતિ તત્તત્તુ સફલં સમ્ભવિષ્યતિ ॥ ૪૭॥
વરાન્ વૃણુત દેવેશા મુનયો મનસીપ્સિતાન્ ।
દાસ્યામિ તપસા તુષ્ટઃ સ્તોત્રેણ ભવતાં પરાન્ ॥ ૪૮॥

ઇતિ દેવમુનિકૃતં ધૂમ્રવર્ણસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ મુદ્ગલપુરાણં અષ્ટમઃ ખણ્ડઃ । અધ્યાયઃ ૪ । ૮.૪ ૩૪-૪૮॥

- .. mudgalapurANaM aShTamaH khaNDaH . adhyAyaH 4 . 8.4 34-48..

Proofread by Yash Khasbage, Preeti Bhandare

*Dhumravarna Stotram Devamunikritam*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*